बहूनि पुराणे नामान्युक्तानि तेषां प्राधान्यतो भारते कतिचिदुक्तानि "बहुत्वान्नामधेयानि पन्नगानां तपोधन!। न कीर्त्तयिष्ये सर्व्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ। कालियो मणिनागश्च नागश्चापूरणस्तथा। नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः। नीलानीलौ तथा नागौ कल्माषशबलौ तथा। आर्य्यकश्चोग्रकश्चैव नागः कलशपोतकः। सुरामुखो दधिमुखस्तथा विमलपिण्डकः। आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा। निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा। बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिण्डकः। कम्बलाश्वतरौ चापि नागः कालीयकस्तथा वृत्तसंवर्त्तकौ नागौ द्वौ च पद्माविति श्रुतौ। नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः। क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा। करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डरः। मूषकादः शङ्खशिराः पूर्णभद्रो हरिद्रकः। अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा। कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान्। विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्। हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः। कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः। कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा। कर्द्दमश्च महानागो नागश्च बहुमूलकः। कर्कराकर्करौ नागौ कुण्डोदरमहोदरौ। एते प्राधान्यतो नागाः कीर्त्तिता द्विजसत्तम!। बहुत्वान्नामधेयानामितरे नानुकीर्त्तिताः। एतेषां प्रसवो यश्च प्रसवस्य च सन्ततिः। असंख्येयेति मत्वा तान्न ब्रवीमि तपोधन!। बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि। च। अशक्यान्येव संख्यातुं पन्नगानां तपोधन! भा०आ० ३५ अ०। "अहिपरिकरभाजो भास्वरैरङ्गरागैः" माघः। महतोऽप्येनसोमासात्त्वचेवाहिर्विमुच्यते" "न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्" लूताहि शरटानाञ्च तिरश्चां चाम्बुचारिणमिति" च मनुः। ३सूर्य्ये, इन्। ४राहौ, ५पथिके, अह-व्याप्तौ इन्। ६वृत्रासुरे तस्य सर्व्वलोकव्यापकत्वात्तन्नामकत्वम् स च विश्वरूपपितुस्त्वष्टुःपुत्रः तदुत्पत्तिकथा भाग० ६स्क० ६अ० "हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो! विवर्द्धस्व मा चिरं जहि विद्विषम्। अथान्वाहार्य्यपचनादुत्थितो घोरदर्शनः। कृतान्त इव लोकानां युगान्तसमये यथा। विष्वग्विवर्द्धमानं तमिषुमात्रं दिनेदिने। दग्धशैल प्रतीकाशं सन्ध्याभ्रानीकवर्च्चसम्॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम्। देदीप्यमाने त्रिशिखे शूलं आरोप्य रोदसी॥ नृत्यन्तमुन्नदन्तञ्च चालयन्तं पदा महीम्। दरीगम्भीरवक्त्रेण पिवता च नभस्तलम्॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम्। महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः। वित्रस्ता दुद्रुवुर्लोकावीक्ष्य सर्व्वे दिशोदिश॥ येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्त्तिना। सर्व्वे वृत इति प्रोक्तः पापः परमदारुणः"॥ ७खले, ८वञ्चके, ९सर्पस्वामिके अश्लेषानक्षत्रे च। "रुद्रगणस्तीक्ष्णोऽहि रुद्रेन्द्रयुक्" ज्यो०। "द्रुतं धनुःखण्डमिवाहिद्विषः" किरा०। "अद्विषस्तद्भवता निशम्यताम्" माघः। १०आहन्तरि त्रि० "अहिरसि बुध्नः" ताण्ड्य०। अहिराहन्तारिप्रभृतीनाम्" मा०। अह-व्याप्तौ इन्। ११जले महोव्यापित्वात्तत्त्वम् १२ व्यापके १३व्याप्ते च त्रि०। १४द्यावापृथिव्योः द्वि०व० १५पृथिव्यां १६स्त्रीगव्याञ्च स्त्री वा ङीप् नागनामत्वात् तज्जातत्वाच्च १७सीसे धातौ। तस्योत्पत्त्यादिकम् भावप्र० "दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु व्यमोचयत्" वीर्य्यं जातस्ततो नागः सर्वरोगापहोऽन्टणाम्" सीसं बध्नं तथा वप्रं योगेष्टं नागनामकम् (नागोभुजङ्गः) सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम्। नागस्तु नागशततुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति। वह्निं प्रदीपयति कामबलं करोति मृत्युं च नाशयति सन्ततसेवितः सः। पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टम्। पाण्डुप्रमेहानिलमादशोथभगन्दरादीन् कुरुतः प्रभुक्तौ" तस्य पाकविधिमाह तत्रैव। ताम्बूलरस संपिष्टशिलालेपात् पुनः पुनः। द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते। (शिला मनःशिला) अन्यच्च। "अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत्। तत्पात्रे विद्रुतो नागो लोहदर्व्या प्रचालितः। यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला। काञ्जिकेन द्वयं घृष्ट्वा पचेत् दृढपुटेन तम्। स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च। पुनः पचेत् समेताभ्यामेवं षष्टिपुटैर्मृतिः"।

**अहिंसक** त्रि०न हिनस्ति हिन्स-ण्वुल् न०त०। हिंसारहिते

**अहिंसा** स्त्री हिन्स-अङ् न०त०। १वाङ्मनःकायैः परपीड़ाभावे, २प्राणिपीड़ानिवृत्तौ, ३अशास्त्रीयप्राणिपीड़नाभावे च "अहिंसापरमो धर्म्मः" इति स्मृतिः। "या वेद विहिता हिंसा नियतास्मिंश्चराचरे। अहिंसामेव तां विद्यात् वेदाद्धर्म्मोहि निर्बभौ" मनुना वैधहिंसायां दोषाभावउक्तः एतच्च मीमांसकादिनये सांख्यनये तु